७५

(1)

श्रीगणेशायनमः ॥ हरिः ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ॥ पूर्ण
स्यपूर्णमादायपूर्णमेवावशिष्यते ॥ ॐ शांतिः शांतिः शांतिः ईशावास्य
मिदꣳ सर्वंयत्किंचजगत्यांजगत् । तेनत्यक्तेनभुंजीथामागृधः कस्यस्वि
वे द्धनं । कुर्वन्नेवेहकर्माणिजिजीविषेच्छतꣳ समाः । एवंत्वयिनान्यथेतोस्ति
नकर्मलिप्यतेनरे ॥२ असुर्यानामतेलोका अंधेनतमसावृताः । ताꣳस्ते
प्रेत्याभिगच्छंतियेकेचात्महनोजनाः । अनेजदेकंमनसोजवीयोनैनद्देवा
आप्नुवन्पूर्वमर्शत् ॥ तद्धावतोन्यानत्येति तिष्ठत्तस्मिन्नपोमातरिश्वादधा
ति ॥४ तदेजतितन्नैजतितद्दूरेतद्वंतिके । तदंतरस्यसर्वस्यतदुसर्वस्या

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(२)

ईशा० स्यबाह्यतः ।। यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति ।। सर्वभूतेषुचात्मानं

१ ततोनविजुगुप्सते। यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः। तत्रको

मोहः कः शोक एकत्वमनुपश्यतः। सपर्यगाच्छुक्रमकायमव्रणमस्नावि

रꣳशुद्धमपापविद्धंकविर्मनीषीपरिभूः स्वयंभूर्याथातथ्यतोर्थान्व्यदधा

च्छाश्वतीभ्यः समाभ्यः। अंधंतमः प्रविशंतियेविद्यामुपासते। ततो

भूयइवतेतमोयउविद्यायांꣳरताः। अन्यदेवाहुर्विद्ययान्यदाहुरविद्य

या। इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे। विद्यांचाविद्यांचयस्तद्वे

दोभयꣳसह। अविद्यायामृत्युंतीर्त्वाविद्ययामृतमश्नुते। अंधंतमःप्र १

(2A)

विशंतिये संभूतिमुपासते । ततो भूय इवते तमोयउ संभूत्यां२रताः ।अन्यदेवा

दाकु कुः संभवादन्यदाहुरसंभवात् इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे । संभूतिंच

विनाशंचयस्तद्वेदोभयं२सह ॥ विनाशेनमृत्युंतीर्त्वासंभूत्यामृतमश्नुते । हि

रण्मयेनपात्रेणसत्यस्यापिहितंमुखं । तत्वंपूषन्नपावृणुसत्यधर्माय पु

दृष्टये । पूषन्नेकर्षेयमसूर्यप्राजापत्यव्यूहरश्मीन्समूहतेजोयत्तेरूपंकल्या

णतमंतत्तेपश्यामि । योसावसौपुरुषः सोहमस्मि । वायुरनिलममृतमथेदं

भस्मांतं२ शरीरं ।ॐ २ क्रतोस्मरकृतं२स्मरक्रतोस्मरकृतं२स्मर ।अग्ने

नयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् ।युयोध्यस्मज्जुहुराण

Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

ईशा०

२

मेनोभूयिष्ठांतेनमउक्तिंविधेम।ॐ पूर्णमदःपूर्णमिदंपूर्णात्पूर्णमुदच्यते॥
पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यते॥ॐ शांतिःशांतिःशांतिः॥ॐ आप्या
यंतुममांगानिवाक्प्राणचक्षुःश्रोत्रमथोबलमिंद्रियाणिचसर्वाणिसर्वंब्रह्मौ
पनिषदंमाहंब्रह्मनिराकुर्यांमामाब्रह्मनिराकरोदनिराकरणमस्त्वनिराकर
णंमेअस्तुतदात्मनिनिरतेयउपनिषत्सुधर्मास्तेमयिसंतुतेमयिसंतु॥
ॐ शांतिःशांतिःशांतिः॥ॐ केनेषितंपततिप्रेषितंमनःकेनप्राणःप्रथमः
प्रैतियुक्तः।केनेषितांवाचमिमांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्तिश्रोत्रस्य
श्रोत्रंमनसोमनोयद्वाचोहवाचंसउप्राणस्यप्राणश्चक्षुषश्चक्षुरतिमुच्यधीराः २

(3A)

त्रापिविचिकित्सितंकिलत्वंचमृत्योयन्नसुज्ञेयमात्थ।वक्ताचास्यत्वादृगन्योन
लभ्योनान्योवरस्तुल्यएतस्यकश्चित्।शतायुषःपुत्रपौत्रान्वृणीष्वबहून्पशून्ह
स्तिहिरण्यमश्वान्।भूमेर्महदायतनंवृणीष्वस्वयंचजीवशरदोयावदिछसि।
एततुल्यंयदिमन्यसेवरंवृणीष्ववित्तंचिरजीविकांच।महाभूमौनचिकेतस्त्वमे-
धिकामानांत्वाकामभाजंकरोमि।येयेकामादुर्लभामर्त्यलोकेसर्वान्कामान्छंदतः
प्रार्थयस्व।इमारामाःसरथाःसतूर्यानहीदृशालंभनीयामनुष्यैः।आभिर्मत्प्रत्ता
भिःपरिचारयस्वनचिकेतोमरणंमानुप्राक्षीः।श्वोभावामर्त्यस्ययदंतकैतत्सर्वेंद्रि
याणांजरयंतितेजः।अपिसर्वंजीवितमल्पमेवतवैववाहास्तवनृत्यगीते।नवित्ते

(५)

कठव० नतर्पणीयोमनुष्योलप्स्यामहेवित्तमद्राक्ष्मचेत्त्वा। जीविष्यामोयावदीशिष्यसि-
३ त्वंवरस्तुमेवरणीयःसएव। अजीर्यताममृतानामुपेत्यजीर्यन्मर्त्यःकधस्थः
प्रजानन्। अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घेजीवितेकोरमेत। यस्मिन्नि
दंविचिकित्संतिमृत्योयत्सांपरायेमहतिब्रूहिनस्तत्। योयंवरोगूढमनुप्र-
प्रविष्टोनान्यंतस्मान्नचिकेतावृणीते॥ ॥ इतिप्रथमावल्ली॥ ॥
अन्यच्छ्रेयोन्यदुतैवप्रेयस्तेउभेनानार्थेपुरुषंसिनीतः। तयोःश्रेयआददानस्य
साधुभवतिहीयतेर्थाद्यउप्रेयोवृणीते। श्रेयश्चप्रेयश्चमनुष्यमेतस्तौसंपरीत्य-
विविनक्तिधीरः। श्रेयोहिधीरोभिप्रेयसोवृणीतेप्रेयोमंदोयोगक्षेमाद्वृणीते। ३

Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५A)

सत्वंप्रियान्प्रियरूपांश्चकामानभिध्यायन्नचिकेतोत्यस्राक्षीः ।नैतां
सृंकांवित्तमयीमवाप्तोयस्यांमज्जंतिबहवोमनुष्याः ।दूरमेतेविपरीते-
विषूचीअविद्यायाचविद्येतिज्ञाता ॥ विद्याभीप्सिनंनचिकेतसंमन्येनत्वा
कामाबहवोलोलुपंत ।अविद्यायामंतरेवर्तमानाःस्वयंधीराःपंडितंमन्यमा
नाः ॥ दंद्रम्यमाणाःपरियंतिमूढाअंधेनैवनीयमानायथांधा ॥ नसांपरायः
प्रतिभातिबालंप्रमाद्यंतंवित्तमोहेनमूढं ॥अयंलोकोनास्तिपरइतिमानी
पुनःपुनर्वशमापद्यतेमे ॥श्रवणायापिबहुभिर्योनलभ्यःशृण्वंतोपिबह
वोयन्नविद्युः ॥आश्चर्योवक्ताकुशलोस्यलब्धाआश्चर्योज्ञाताकुशलानुशि

(5)

कठव० ष्टः॥ ननरेणावरेणप्रोक्तएषसुविज्ञेयोबहुधाचिंत्यमानः॥ अनन्यप्रो
८ क्तेगतिरत्रनास्त्यणीयान्ह्यतर्क्यमणुप्रमाणात्॥ नैषातर्केणमतिरापनेया
प्रोक्तान्येनैवसुज्ञानायप्रेष्ठ। यांत्वमापःसत्यधृतिर्बतासित्वादृङ्नोभू
यान्नचिकेतःप्रष्टा। जानाम्यहंशेवधिरित्यनित्यंनह्यध्रुवैःप्राप्यते
हिध्रुवंतत्। ततोमयानचिकेतश्चितोग्निरनित्यैर्द्रव्यैःप्राप्तवानस्मिनि
त्यं। कामस्याप्तिंजगतःप्रतिष्ठांक्रतोरानंत्यमभयस्यपारं। स्तोममहदु
रुगायंप्रतिष्ठांदृष्ट्वाधृत्या। धीरोनचिकेतोत्यस्राक्षीः। तंदुर्दर्शंगूढमनु
प्रविष्टंगुहाहितंगह्वरेष्ठंपुराणं। अध्यात्मयोगाधिगमेनदेवंमत्वाधीरो

(5A)

हर्षशोकौजहाति ॥ एतच्छ्रुत्वासंपरिगृह्यमर्त्यः प्रवृह्यधर्म्यमणुमेतमा
प्यसमोदतेमोदनीयं हि लब्ध्वा विवृतं सद्मनचिकेतसंमन्ये ।अन्य
त्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।अन्यत्रभूताच्चयत्तत्पश्यसित
द्वद । सर्वेवेदायत्पदमामनंतितपांसिसर्वाणिचयद्वदंति । यदिच्छंतोब्रह्म
चर्यंचरंतितत्तेपदं संग्रहेणब्रवीम्योमित्येतत् । एतध्येवाक्षरंब्रह्मैतध्येवा
क्षरंपरं ॥ एतध्येवाक्षरंज्ञात्वायोयदिच्छतितस्यतत् । एतदालंबनंश्रेष्ठंत ए
दालंबनंपरं । एतदालंबनंज्ञात्वाब्रह्मलोकेमहीयते । नजायतेम्रियतेवा
विपश्चीन्नायंकुतश्चिन्नबभूवकश्चित् । अजोनित्यःशाश्वतोयंपुराणो

नहन्यतेहन्यमानेशरीरे। हंताचेन्मन्यतेहंतुं हतश्चेन्मन्यतेहतं। उभौतौनवि
जानीतोनायंहंतिनहन्यते ॥ अणोरणीयान्महतोमहीयानात्मास्यजंतोर्नि-
हितोगुहायां। तमक्रतुः पश्यतिवीतशोकोधातुप्रसादान्महिमानमात्मनः।
आसीनोदूरंव्रजतिशयानोयातिसर्वतः। कस्तंमदामदंदेवंमदन्योज्ञातुमर्ह
ति। अशरीरंशरीरेष्वनवस्थेष्ववस्थितं। महांतंविभुमात्मानंमत्वाधीरो
नशोचति। नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन। यमेवैषवृ
णुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनुंस्वां ॥ नाविरतोदुश्चरितान्ना
शांतोनासमाहितः। नाशांतमानसोवापिप्रज्ञानेनेनमाप्नुयात् ॥ यस्यब्रह्मच ५

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

स्त्रत्रंचोभेभवतओदनः। मृत्युर्यस्योपसेचनंकइत्थावेदयत्रसः॥ इतिद्वितीया
वल्ली॥ ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्धे॥ छायातपौब्रह्म-
विदोवदंतिपंचाग्नयोयेचत्रिणाचिकेताः। यःसेतुरीजानानामक्षरंब्रह्मयत्परं॥
अभयंतितीर्षतांपारंनाचिकेतंशकेमहि। आत्मानंरथिनंविद्धिशरीरंर
थमेवतु। बुद्धिंतुसारथिंविद्धिमनःप्रग्रहमेवच। इंद्रियाणिहयानाहुर्विष
यांस्तेषुगोचरान्। आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः॥ यस्त्वविज्ञान
वान्भवत्ययुक्तेनमनसासदा। तस्येंद्रियाण्यवश्यानिदुष्टाश्वाइवसारथेः। यस्तु
विज्ञानवान्भवतियुक्तेनमनसासदा। तस्येंद्रियाणिवश्यानिसदश्वाइवसा

व

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai ... project

(7)

कठव०
६

रथेः। यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः। नसतत्पदमाप्नोतिसं॰-
सारंचाधिगछति। यस्तुविज्ञानवान्भवतिसमनस्कः सदाशुचिः। सतुतत्पद
माप्नोतियस्माद्भूयोनजायते। विज्ञानसारथियस्तुमनःप्रग्रहवान्नरः॥ सोध्व
नः परमाप्नोतितद्विष्णोःपरमंपदं। इंद्रियेभ्यः पराह्यर्थाअर्थेभ्यःश्चपरंमनः
।मनसस्तुपराबुद्धिबुद्धेरात्मामहान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः
पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिः। एषसर्वेषुभूतेषुगूढोत्मानप्रकाश
ते। दृश्यतेत्वग्ययाबुध्यासूक्ष्मयासूक्ष्मदर्शिभिः। यछेद्वाङ्मनसीप्राज्ञस्त
द्यछेत्ज्ञानआत्मनि। ज्ञानमात्मनिमहतिनियछेत्तद्यछेछांतआत्मनि। ६

(2A)

उत्तिष्ठतजाग्रतप्राप्यवरान्निबोधत। क्षुरस्यधारानिशितादुरत्ययादुर्गं
पथस्तत्कवयोवदंति।अशब्दमस्पर्शमरूपमव्ययंतथारसंनित्यमगंध
वच्चयत्।अनाद्यनंतंमहतःपरंध्रुवंनिचाय्यतंमृत्युमुखात्प्रमुच्यते।
नाचिकेतमुपाख्यानंमृत्युप्रोक्तंसनातनं।उक्त्वाश्रुत्वाचमेधावीब्रह्म
लोकेमहीयते।यइमंपरमंगुह्यंश्रावयेद्ब्रह्मसंसदि।प्रयतश्राद्धका
लेवातदानंत्यायकल्पतेतदानंत्यायकल्पतइति॥इतितृतीयावल्ली॥
॥प्रथमोध्यायः॥ॐम् परांचिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्य
तिनांतरात्मन्।कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिछ

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(8)

कठव. न् पराचः कामाननुयंति बालास्ते मृत्योर्यंति विततस्य पाशं। अथो धीरा अमृ
७ त्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयंते। येन रूपंॅ रसं गंधंॅ शब्दाॅ स्पर्शांॅ र
श्च मैथुनान्। एतेनैव विजानाति किमत्र परिशिष्यत एतद्वै तत्। स्वप्नांतं
जागरितांतं चोभौ येनानुपश्यति। महांतं विभुमात्मानं मत्वा धीरो न शोचति।
य इमं मध्वदं वेदात्मानं जीवमंतिकात्। ईशानं भूतभव्यस्य न ततो विजुगु
प्सत एतद्वै तत्। यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत। गुहां प्रविश्य ति
ष्ठंतं यो भूतेभिर्व्यपश्यत एतद्वै तत्। या प्राणेन संभवत्यदितिर्देवतामयी।
गुहां प्रविश्य तिष्ठंतीं या भूतेभिर्व्यजायत एतद्वै तत्। अरण्योर्निहितो जात ७

(8A)

वेदा गर्भइव स्सुभृतो गर्भिणीभिः। दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनु
ष्येभिरग्निरेतद्वैतत्। यतश्चोदेति सूर्यो स्तंयत्र च गच्छति। तंदेवाः सर्वेऽर्पि
तास्तदुनात्येति कश्चन एतद्वैतत्। यदेवेह तदमुत्र यदमुत्र तदन्विह। मृत्योः
स मृत्युमाप्नोति यइह नानेव पश्यति। मनसैवेदमाप्तव्यं नेह नानास्ति किं
चन मृत्योः स मृत्युं गच्छति यइह नानेव पश्यति। अंगुष्ठमात्रः पुरुषो मध्य आ
त्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सत एतद्वैतत्। अंगुष्ठ
मात्रः पुरुषो ज्योतिरिवाधूमकः ईशानो भूतभव्यस्य स एवाद्य स उ श्व एत
द्वैतत्। यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति। एवं धर्मान्पृथक्पश्यंस्ता

(१)

कठव० नेवानुविधावति। यथोदकंꣳशुद्धे शुद्धमासिक्तं तादृगेवभवति। एवंमुने

६ र्विजानतआत्माभवतिगौतम॥ इतिप्रथमावल्ली॥ पुरमेकादशद्वारम

जस्यावक्रचेतसः। अनुष्ठायनशोचति विमुक्तश्च विमुच्यतएतद्वैतत्।

हꣳसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरस

दृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत्। ऊर्ध्वंप्राणमु

न्नयत्यपानंप्रत्यगस्यति। मध्येवामनमासीनंविश्वेदेवाउपासते। अस्य

विस्रꣳसमानस्यशरीरस्थस्यदेहिनः। देहाद्विमुच्यमानस्यकिमत्रपरि

शिष्यतएतद्वैतत्। नप्राणेननापानेनमर्त्योजीवतिकश्चन। इतरेणतु ६

(9A)

जीवंतियस्मिन्नेतावुपाश्रितो। हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनं। य
थाचमरणंप्राप्यात्माभवतिगोतम। योनिमध्येप्रपद्यंतेशरीरत्वायदेहिनः। स्थाणु
मध्येनसंयंतियथाकर्मयथाश्रुतं। यएषसुप्तेषुजागर्तिकामंकामंपुरुषोनिर्माणः
। तदेवश्रुतंतद्ब्रह्मतदेवामृतमुच्यते। तस्मिंल्लोकाःश्रिताःसर्वेतदुनात्येतिक-
श्चनएतद्वैतत्।। अग्निर्यथैकोभुवनंप्रविष्टोरूपं२रूपंप्रतिरूपोबभूव। एक
स्तथासर्वभूतांतरात्मारूपं२रूपंप्रतिरूपोबहिश्च। वायुर्यथैको०। सूर्योयथा-
सर्वलोकस्यचक्षुर्नलिप्यतेचाक्षुषैर्बाह्यदोषैः। एकस्तथासर्वभूतांतरात्मान-
लिप्यतेलोकदुःखेनबाह्यः। एकोवशीसर्वभूतांतरात्मैकं२रूपंबहुधायःक

(१०)

कठव॰ रोति। तमात्मस्थंयेनुपश्यंतिधीरास्तेषाꣳ सुखꣳ शाश्वतंनेतरेषां।नित्योनि
९ त्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामान्।तमात्मस्थंयेनुपश्यं
तिधीरास्तेषाꣳ शांतिः शाश्वतीनेतरेषां।तदेतदितिमन्यंतेनिर्देश्यंपरमꣳ सुखं
।कथंनुतद्विजानीयांकिमुतद्भातिविभातिवा।नतत्रसूर्योभातिनचंद्रतारकंने
माविद्युतोभांतिकुतोयमग्निः।तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंवि
भाति॥वल्ली३॥५॥ऊर्ध्वमूलोवाक्शाखएषोश्वत्थःसनातनः।तदेवशु-
क्रंतद्ब्रह्मतदेवामृतमुच्यते।तस्मिंल्लोकाःश्रिताःसर्वेतदुनात्येतिकश्चनएत-
द्वैतत्।यदिदंकिंचजगत्सर्वंप्राणएजतिनिःसृतं।महद्भयंवज्रमुद्यतंयए ९

(11)

श्रीगणेशायनमः॥ श्रीसोमेश्वरायनमः जगदंबायेनमः॥ देविसुरेश्वरिभगवतिगं
गेत्रिभुवनतारिणितरलतरंगे॥ शंकरमौलिनिवासिनिविमलेमममतिरास्तांतव
पदकमले॥१॥ भागीरथिसुखदायिनिमातः स्तवजलमहिमानिगमख्यातः॥ नाहं
जानेतवमहिमानंपाहिकृपामयिमामज्ञानं॥२॥ हरिपदपद्मतरंगिणिगंगेहिमविधु
मुक्ताधवलतरंगे॥ दूरीकुरुममदुष्कृतभारंकुरुकृपयाभवसागरपारं॥३॥ तव
जलममलंयेनचपीतंपरमपदंखलुतेनगृहीतं॥ मातर्गंगेत्वयियोभक्तःकिल
तंद्रष्टुंनयमःशक्तः॥४॥ पतितोद्धारिणिजाह्नविगंगेखंडितगिरिवरमंडितरंगे॥
भीष्मजननिनिजनियमापतितः कस्त्वांरह्यानंदंयातः॥५॥ कल्पलतामिवफ
लदांलोकेप्रणमतिकस्त्वांनपततिशोके॥ तवकृपयाब्धिस्रोतःस्नातः पुनरपि
जठरेकोपिनजातः॥६॥ पारावारविहारिणिगंगेविबुधवधूकुचकुंकुमपिंगे॥ नर
कनिवारिणिनिर्मलनीरेहरिरिहतिष्ठतिकिलतवतीरे॥७॥ तवपयसानहिवि
ष्णोर्भेदः कथमिहमूढेहृदयेखेदः॥ मातर्गंगेकल्मषभंगेविघ्नविनाशिनिबहु

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai project

(12) ४८

स्तो॰गं॰ १

पालुंगे॥८॥परिस्तेलेदंगेतरलतरंगेभयतमजाह्नविकरुणापांगे॥इंद्रमुकुटमणिरा
जितचरणेसुखदेशुभदेसेवकशरणे॥९॥रोगंशोकंपापंतापंहरमेजाह्नविकुमति
कपालं॥त्रिभुवनसारेवसुधाहारेत्वमसिगतिर्मेखलुसंसारे॥१०॥हेलकनंदे
परमानंदेकुरुमयिकरुणांमुनिगणवंद्ये॥तवतटनिकटेयस्यनिवासःखलु
वैकुंठेतस्यविलासः॥११॥वरमिहनीरेकमठोमीनःकिंवातीरेसरठोहीनः॥अ
थवाविहगःश्वपचोदीनोनदूरेनृपतिस्तवनकुलीनः॥१२॥भुवनेश्वरिहेपुण्येधन्ये
हविद्रुममयिमुनिवरकन्ये॥येषांहृदयेगंगाभक्तिस्तेषांभवतिसुखदासु
क्तिः॥१३॥मधुरस्कपदकविपरमानंदंकलिमलहरमितिहृद्दिसानंदं॥ललि
तंगंगास्तवमखिलंनित्यंपठतिनरोयःसजयतिनित्यं॥१४॥गंगास्तोत्रंखलुभ ३
वसारंवांछितफलदंविहितमुदारं॥शंकरसेवितशंकररचितंपठतोविषयो हेरंबु
भवतिसमाप्तः॥१५॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्य
विरचितंगंगास्तोत्रंसमाप्तः॥कान्हेरेउपनामकगोपाळेनलिखितं॥शुभंभवतु॥

" Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai."

(12A)

यस्यचाकामहतस्य।तेयेशतंमनुष्यगंधर्वाणामानंदाः।सएकोदेवगंधर्वाणामा
नंदः।श्रोत्रियस्यचाकामहतस्य।तेयेशतंदेवगंधर्वाणामानंदाः।सएकःपितृणांचि
रलोकलोकानामानंदः।श्रोत्रियस्यचा०।।तेयेशतंपितृणांचिरलोकलोकानामानं
दाः।सएकआजानजानांदेवानामानंदः।श्रोत्रियस्य०।तेयेशतमाजानजानांदेवा
नामानंदाः।सएकःकर्मदेवानांदेवानामानंदः।।येकर्मणादेवानपियंति।श्रोत्रियस्य०।।
तेयेशतंदेवानामानंदाः।सएकइंद्रस्यानंदः।श्रोत्रियस्य०।तेयेशतमिंद्रस्यानंदाः।स
एकोबृहस्पतेरानंदः।श्रोत्रियस्य०।तेयेशतंबृहस्पतेरानंदाः।सएकोब्रह्मणआ
नंदः।श्रोत्रियस्य०।सयश्चायंपुरुषे।यश्चासावादित्ये।सएकः।सयएवंवित्।अ
स्माल्लोकात्प्रेत्य।एतमन्नमयमात्मानमुपसंक्रामति।एतंप्राणमयमात्मानमुप
संक्रामति।एतंमनोमयमात्मानमुपसंक्रामति।एतंविज्ञानमयमात्मान०।एतमा

(13)

राध० नंदमयमात्मानं०॥ तदप्येषश्लोको भवति। यतोवाचोनिवर्तंते। अप्राप्यमनसासह। आनं
४ दंब्रह्मणोविद्वान्। नबिभेतिकुतश्चनेति। एतंहवावनतपति। किमहंसाधुनाकरवं।
किमहंपापमकरवमिति। सयएवंविद्वानेतेआत्मानंस्पृणुते। उभेह्येवैषएतेआत्मानं
स्पृणुते। यएवंवेद। इत्युपनिषत्॥ इत्यनुवाकंजपित्वा॥ हरिकीर्तनपुरःसरंहर्षनृत्यंकृत्वा
तस्मात्पुनर्मंडलेसंस्थाप्य। चंदनाक्षतपुष्पाणिपूजाविशिष्टानिबंधुभिःसहस्वयंधृत्वा
विप्रान्प्रदक्षिणीकृत्य आनंदमानंदकरंप्रसन्नंज्ञानस्वरूपंनिजबोधरूपं। योगींद्रमी
ड्यंभवरोगवैद्यंश्रीमद्गुरुंनित्यमहंनमामि॥ गुरुर्ब्रह्मागुरुर्विष्णु० गुरवेनमः॥ इत्यादि
मंत्रैर्विप्रांस्तीर्थराजंनमस्कृत्य गुर्वर्थविप्रहस्तेपादोदककलशंदत्वातदाज्ञयातत्तीर्थं
मंत्रेणगृह्णीयात् तत्रमंत्रः अविद्यामूलशमनंसर्वपापप्रणाशनं। गुरुपादोदकंचित्रं राम
संसारद्रुमनाशनं॥ उत्रादिकामनायांतु शोषणंपापपंकस्यदीपनंज्ञानतेजसः। गुरु ४

(13अ)

पादोदकंचित्रंपुत्रंपौत्रप्रवर्धनं॥इतिमंत्रेणगृह्णीयात्।ततोविप्रान्प्रणम्यदक्षि
णालंकारादिभिस्तोषयित्वासन्मानपुरःसरंताननुव्रज्यकर्मेश्वरार्पणंकुर्यात्सुत
घुक्तोभुंजीतेति इत्थंविस्तरेणाराधनकरणाशक्तौयथाशक्तिब्राह्मणानाहूय
पादप्रक्षालनपूर्वकंगंधादिभिरभ्यर्च्यब्रह्मीभूतस्यगुरूद्देशेनभोजयेदिति
सद्गुरुमाहात्म्यानंतरंतथैवसमाराधनं॥इदमाराधनंचतुर्विधानामपि
संन्यासीनांसमानमेव चतुर्विधाभिक्षवस्तूक्ताचंद्रिकायां॥चतुर्विधा
भिक्षवस्तु विख्याताब्रह्मणामुखात्॥कुटीचकोबहूदकोहंसश्चैवतृ
तीयकः॥चतुःपरमहंसश्चसंज्ञाभेदःप्रकीर्तिताइति॥एषांलक्षणानि
तत्रैवज्ञेयानि॥इतिसन्यासीनामाराधनप्रयोगः॥श्रीनारायणप्रसन्नः॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(14)

आरा॰ना॰ श्रद्धायांप्राणेनिविष्टोमृतंजुहोमि॥शिवोमाविशाप्रदाहाय॥प्राणायस्वाहा॥
५ श्रद्धायामपानि विष्टोमृतंजुहोमि॥शिवो॰अपानायस्वाहा॥श्रद्धायांव्या
नेनिविष्टोमृतंजुहोमि॥शिवोमावि॰व्यानायस्वाहा॥श्रद्धायामुदानेनि
विष्टोमृतंजुहोमि॥शिवोमा॰उदानायस्वाहा॥श्रद्धायाꣳसमानेनिवि॰
शिवोमा॰समानायस्वाहा॥ब्रह्मणिमआत्मामृतत्वाय॥अमृतोपस्त
रणमसि॥६॥पुनः श्रद्धायांप्राणेनिविष्टोमृतंजुहोमितिमंत्रेणपठित्वा॥
ब्रह्मणिमआत्मामृतत्वाय॥अमृतापिधानमसि॥श्रद्धायांप्राणेनिवि
श्यामृतꣳहुतं प्राणमन्नेनाप्यायस्व॥श्रद्धायामपानेनिविश्यामृतꣳ
हुतं॥अपानमन्नेनाप्यायस्व॥श्रद्धायांव्यानेनि॰व्यानमन्नेनाप्याय॰५

(15A)

श्रद्धायामुदानेनि०॥ उदानमंत्रेण० उदानायस्वाहा॥ श्रद्धायां समानेनिवि
ष्ट्यामृतं हुतं॥ समानमंत्रेणाप्यायस्व॥ समानायस्वाहा॥ ॐ ब्रह्मणे
स्वाहा॥ अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाश्रितः॥ ईशः सर्वस्यजगतः प्र
भुःप्रीणातिविश्वभुक्॥ रौरवे॥ ओं तद्ब्रह्म॥ ओं तद्वायुः॥ ॐ तदात्मा॥
ॐ तत्सत्यं॥ ॐ तत्सर्वं॥ ओं तत्पुरोर्नमः॥ अंतश्चरतिभूतेषु गुहायां
विश्वमूर्तिषु॥ त्वं यज्ञस्त्वंवषट्कारस्त्वमिंद्रस्त्वं रुद्रस्त्वं विष्णुस्त्वं ब्रह्म॥
त्वं प्रजापतिः॥ त्वं तदाप आपो ज्योती रसोमृतं ब्रह्म भूर्भुवस्सुवरोम्॥
श्रीकृष्णार्पणमस्तु॥ इदंपरां ज्येउष्णनामक नारायणभट्टेनलिखितं॥ श्री॥
शके १७०१ प्रमाथीनामाब्दे फाल्गुनेमासे असितपक्षे पुस्तकं समाप्तं॥
मार्गशीर्षशुद्ध ८

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(15)

आधनाप्र०

॥ ६ ॥

॥इतिसन्यासिनामाराधनमाब्दिकश्राद्धप्रयोगःसमाप्तः॥

राम॥

॥६॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com